श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमहालक्ष्म्यै नमः

श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे

# ॥ कारुण्यस्तबकः चतुर्थः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

# ॥ कारुण्यस्तबकः चतुर्थः ॥

भजे भुजङ्गशैलेश भुजान्तरपरिष्क्रियाम्।
तनयां दुग्धजलधेः दयामिव कृतोदयाम्॥ **4.1** ॥

जननि जीवयितुं जगदर्दितं
दशमुखप्रमुखैस्त्रिदशारिभिः।
जनकयज्ञमहीजठरे जनिं
कृतवती भवती कृपया रमे॥ **4.2** ॥

अकरुणा करुणा ध्रुवमम्ब ते
क्षितितले भवतीमवतार्य या।
अहह यातुपुरस्थितिवेदनां
अगमयज्जगदार्तिनिवृत्तये॥ **4.3** ॥

अविरतविविधापराधकारि -
ण्यपि मयि देवि दयां करिष्यसीति।
जननि मम भयातुरस्य धैर्यं
जनयति वायसदानवापदानम्॥ **4.4** ॥

राघवस्य हृदयं स्थिराघवत्
वायसं प्रति न वायसक्रमम्।
देवि जानकि दयारसात्त्वया
पादयोजनकृता द्रवीकृतम्॥ **4.5** ॥

अब्धेः कन्ये जननि महतामागसां जन्मगेहे -
ष्वस्मादृक्षेष्वपि च करुणामादधासि ध्रुवं त्वम्।
साक्षी तस्मिन् युधि दशमुखे सारसाक्षि व्यपेते
यातुस्त्रीणां कबलनविधिं याचमानो हनूमान्॥ **4.6** ॥

रामस्तिष्ठतु नाम यो न विदयो जिह्रेति निर्हेतुकं
सुग्रीवैकविरोधिनं क्षितिसुते संहृत्य तं वालिनम्।
कारुण्याम्बुनिधिस्त्वमेव नियतं क्लृप्तात्मपीडं यतो
रक्षःस्त्रीनिकरं ररक्षिथ तमप्यार्द्रागसं वायसम्॥ **4.7** ॥

गुरुणा प्लवेन करुणात्मना विना
हरिणाङ्कसोदरि गुणाम्बुधे तव।
जननाधिरोगमरणादिवेदना -
वरुणालयस्य तरणाय का गतिः॥ **4.8** ॥

त्वय्येवायतते कृपा रघुपतेर्देवस्य सत्यं यतो
वैदेहि त्वदसन्निधौ भगवता वाली निरागा हतः।
निन्ये कापि वधं वधूस्तव तु सान्निध्ये त्वदङ्गव्यथां
कुर्वाणोऽप्यवितः पतन्नशरणः काको विवेकोज्झितः॥ **4.9** ॥

द्विपञ्चग्रीवाज्ञाचकित समुदञ्चन्निशिचर -
प्रपञ्चप्रक्षिप्तः पवनसुतवाले हुतवहः।
यतो जातः शीतस्तमिह भवसन्तापविवशे
कृपापूरं स्वैरं किरतु मयि लोकाम्ब भवती॥ **4.10** ॥

विष्णावुष्णांशुवंशं गतवति विबुधद्वेषिशोषाय रोषात्
एष्यत्तद् योषिदागः शतमपि कृपया क्षन्तुकामेव नूनम्।
धत्ते कन्या जनन्या गुणमिति निपुणं किंवदन्तीं विदन्ती
पूर्वं सर्वं सहायामुदयमकुरुथा भोगिशैलेन्द्रकान्ते॥ **4.11** ॥

अवितुमिह दया ते देवि मार्गत्यशक्तान्
अहमपि शरणार्थी हन्त मज्जन् भवाब्धौ।
घटनमुचितमासीदावयोर्दैवयोगात्
कलशजलधिकन्ये हातुमेतन्न युक्तम्॥ **4.12** ॥

कार्येषु कारणगुणाः नियतं भवन्ती -
त्युक्तिं सतामवितथामवधारयामः।
चान्द्री कला च भवती च पयोधिमध्यात्
जाते यदम्ब सुधया दयया च शीते॥ **4.13** ॥

आसादितोन्नतपदेषु गिरीशमुख्ये -
ष्वारोढुमब्जनिलये शिथिलाभिलाषा।
नीचे तु मादृशि दयारसनिम्नगा ते
प्राप्तादरा प्रवहतीत्यनुरूपमेतत्॥ **4.14** ॥

शौरिश्चकास्ति हृदयेषु शरीरभाजां
तस्यापि देवि हृदयं त्वमनुप्रविष्टा।
पद्मे तवापि हृदये प्रथते दयेयं
तामेव जाग्रदखिलातिशयां श्रयामः॥ **4.15** ॥

नित्यं विश्वं वशयति हरिर्निग्रहानुग्रहाभ्याम्
आद्ये शक्तिं विघटयति ते हन्त कारुण्यपूरः।
ईषन्न्यूनं तदिह दयितादीशितृत्वं भवत्याः
तच्छेषत्वं कथमितरथा देवि तुल्येऽपि भूम्नि॥ **4.16** ॥

विहितं जहतं विवेकहानात्
अहितं कर्म च नित्यमाचरन्तम्।
अपयातगुणं हरिप्रिये मां
कृपया केवलयैव पालयेथाः॥ **4.17** ॥

क्षणमप्यसहास्थितौ जनागः
कमिता न क्षमितेति सानुकम्पा।
अवतारदशासु देवि रूपैः
अनुरूपैरनुगाहसे मुकुन्दम्॥ **4.18** ॥

गलति कलितायासे श्वासे कफार्गलिते गले
भ्रमति नयने भ्रान्ते स्वान्ते यियासुषु चासुषु।
त्वरयति दया जन्तोरन्तोत्क्रमे भवतीं रमे
त्वमपि कृपणत्राणे प्राणेश्वरं च पराङ्मुखम्॥ **4.19** ॥

दुःखाक्रान्तं भवजलनिधिं दुस्तरं योगिवर्यैः
पापानां नस्तरितुमधुना का कथा लोकधात्रि।
एवं यद्यप्युदयति मतिस्तावकीमब्धिकन्ये
धन्ये दृष्ट्वा तदपि करुणां धैर्यमेत्यन्तरात्मा॥ **4.20** ॥

तपोभिरिह योगिनस्तव दयामविन्दन्त याम्
अकिञ्चनतयैवताममृतसोदरि प्राप्नुमः।
समाधिपटवः श्रमादनुभवन्ति यद्दैवतं
तदेव यमुनातटीतरुगणः सुखेनान्वभूत्॥ **4.21** ॥

अपारपरितापकृद्द्रवतपातपान्धा वयं
प्रपामिव सुपावनीं तव कृपामुपासीमहि।
उदञ्चितधनञ्जयः प्रभुरुदारहेतिर्यया
ययावुदधिकन्यके तपनमध्यगः शीतताम्॥ **4.22** ॥

कंसारातिप्रेयसि संसाराब्धौ भ्रमन्ननाथोऽहम्।
अम्ब तव साध्वकम्पाम् अनुकम्पान्नावमवलम्बे॥ **4.23** ॥

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे कारुण्यस्तबकः चतुर्थः॥